वैयाकरणसिद्धान्तकौमुदी

कारकप्रकरणम् - द्वितीयाविभक्तिः (६)

१५.१०.२०११

तृतीयार्थे (१.४.८५)

- एकपदात्मकं सूत्रम् ।
- 'कर्मप्रवचनीयाः' (१.४.८३) इति अधिक्रियते । 'अनुर्लक्षणे' (१.४.८४) इत्यतः 'अनुः' इति अनुवर्तते ।
- अस्मिन् द्योत्ये अनुः उक्तसंज्ञः स्यात् ।
- 'सहयुक्तेऽप्रधाने' इति तृतीयार्थे साहित्ये द्योत्ये इत्यर्थः ।
- नदीम् अन्ववसिता सेना ।
- नद्या सह सम्बद्धा इत्यर्थः ।
- 'षिञ् बन्धने' क्तः ।

हीने (१.४.८६)

- एकपदात्मकं सूत्रम् ।
- 'कर्मप्रवचनीयाः' (१.४.८३) इति अधिक्रियते । 'अनुर्लक्षणे' (१.४.८४) इत्यतः 'अनुः' इति अनुवर्तते ।
- हीने द्योत्ये अनुः प्राग्वत् ।
- अनु हरिं सुराः ।
- हरेः हीनाः इत्यर्थः ।

उपोऽधिके च (१.४.८७)

- त्रीणि पदानि । उपः, अधिके, च ।
- चकाराद् हीने इति समुच्चीयते ।
- अधिके हीने च द्योत्ये उप इत्यव्ययं प्राक्संज्ञं स्यात् ।
- अधिके सप्तमी वक्ष्यते ।
- हीने - उप हरिं सुराः ।
- हरेः हीनाः इत्यर्थः ।

लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः (१.४.९०)

- पदद्वयम् । लक्षण-इत्थंभूताख्यान-भाग-वीप्सासु, प्रति-परि-अनवः ।
- 'कर्मप्रवचनीयाः' (१.४.८३) इति अधिक्रियते ।
- एष्वर्थेषु विषयभूतेषु प्रत्यादयः उक्तसंज्ञाः स्युः ।
- लक्षणं ज्ञापकम् ।
- लक्षणे वृक्षं प्रति परि अनु वा विद्योतते विद्युत् ।
- प्रकाशितेन वृक्षेण विद्युज्ज्ञानाद् वृक्षः लक्षणम् ।

- अयं प्रकारः इत्थम्, तं प्राप्तः इत्थंभूतः, तस्य आख्यानम्=उपपादकम् ।
- इत्थंभूताख्याने भक्तो विष्णुं प्रति ।
- अत्र भक्तः भक्तिरूपं प्रकारविशेषं प्राप्तत्वाद् इत्थंभूतः, तस्य विष्णुविषयकत्वम् उपपादयति प्रतिः।
- विष्णुविषयकभक्तिमान् इत्यर्थः ।

- भागः स्वीकार्योंऽशः, तत्स्वामी विवक्षितः ।
- भागे - लक्ष्मीः हरिं प्रति परि अनु वा ।
- हरेः भागः इत्यर्थः ।

- व्याप्तुं कात्स्न्र्येन सम्बन्धुम् इच्छा वीप्सा ।
- वीप्सायाम्, वृक्षं वृक्षं प्रति परि अनु वा सिञ्चति ।
- अत्र उपसर्गत्वाभावात् न षत्वम् ।
- एषु किम्?
- परिषिञ्चति ।

अभिरभागे (१.४.९१)

- पदद्वयम् । अभिः, अभागे ।
- भागवर्जे लक्षणादौ अभिः उक्तसंज्ञः स्यात् ।
- लक्षण-इत्थंभूताख्यान-वीप्सासु इत्यर्थः ।
- हरिम् अभि वर्तते ।
- जयः क्व इति प्रश्ने इदमुत्तरम् । हरिलक्ष्यो जयः इत्यर्थः ।

- भक्तो हरिम् अभि ।
- देवं देवम् अभि सिञ्चति ।
- उपसर्गत्वाभावात् न षत्वम् ।

- अभागे किम्?
- यदत्र मम अभिष्यात् तद्दीयताम् ।
- भागे द्योत्ये द्वितीया विभक्तिरपि न भवति, षत्ववारणमपि न ।